जून तः जुलाई २०२६ पर्यन्तम्
ज्येष्ठ (अधि.) कृष्ण-प्रतिपदा तः श्रावणकृष्णा-द्वितीया पर्यन्तम्
(वैक्रमाब्दः-२०८३)

RNI
DELSAN/2013/50379

ISSN:2347-1565

संस्कृत-चन्द्रिका

मासिकी संस्कृत-बालपत्रिका

(वर्षम्-१३-अ±: ११-१२)
(संयुक्ता±:)

सम्पादकः
शैलेन्द्रकुमारसिंहः
सचिवः

ISSN-2347-1565

मूल्यम्- ₹25 रूप्यकाणि

संस्कृत-चन्द्रिका

'मासिकी संस्कृत-बाल-पत्रिका'

जून तः जुलाई २०२६ पर्यन्तम्

वर्षम्-१३ अ±:-११-१२
(संयुक्ता±:)
(वैक्रमाब्दः-२०८३)

(ज्येष्ठ (अधि.) कृष्ण-प्रतिपदा तः श्रावणकृष्ण-द्वितीया पर्यन्तम्)

सम्पादकः
शैलेन्द्रकुमारसिंहः
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः

क्र.सं.	अनुक्रमणिका	पृष्ठ-संख्या	
१.	सम्पादकीयम्	सम्पादकः/सचिवः	III
२.	राष्ट्रस्य हृदयम्	डॉ. हर्षदेवमाधवः	१
३.	सुकन्या	डॉ. रामकिशोरमिश्रः	३
४.	क्षणिकाः -७	प्रो. शुकदेवः शर्मा	४
५.	क्षणिकाः -८	,,	६
६.	कवनकुसुमगुच्छः	डॉ. एन् के. सुन्दरेश्वरम्	८
७.	परब्रह्मवन्दम्	डॉ. देवीसहायपाण्डेयः	९
८.	श्रीरामदशकम्	प्रो. सुन्दरनारायणझाः	१०
९.	मातृभूमिः	डॉ. रामकिशोरमिश्रः	१२
१०.	अस्माकं तीर्थानि	डॉ. मंजूलता शर्मा	१३
११.	षड्यन्त्रम्	डॉ. हर्षदेवमाधवः	१४
१२.	एकतायाः बलम्	डॉ. राकेशः शास्त्री	१६
१३.	रजतस्य प्रभावः	,,	१७
१४.	मन्दारः	डॉ. सौ.शारदा गाडगे	१८
१५.	स्वप्ने विश्वासः न कार्यः	,,	१९
१६.	किमस्ति यन्न दृश्यते सखेत्र दूरभाषके	डॉ. युवराजः भट्टराई	२०
१७.	लोभः	डॉ. राकेशः शास्त्री	२४

दिल्ली संस्कृत अकादमी
(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)
DELHI SANSKRIT ACADEMY
(Govt. of N.C.T., Delhi)
ई-पत्रिका

प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाषः - 011-23635592, 23637798

सदस्यताशुल्कम्

प्रति-अङ्कम् : ₹25 रूप्यकाणि

वार्षिकम् : ₹250 रूप्यकाणि

ISSN : 2347-1565

©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः अन्तर्जालमाध्यमेन (online) अथवा सी०टी०सी० चैक माध्यमेन

(दिल्लीसंस्कृतअकादमीपक्षे)

E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com

Website : www.sanskritacademy.delhi.gov.in

सम्पादकीयम्

अयि गीर्वाणवाणीसमुपासकाः सुहृदयाः!

भवन्तः भवन्त्यश्च जानन्त्येव यत् विपत्तौ विपत्तिकाले वा मनसः स्थरीकरणमेव धैर्यं। मनः चंचलः, अतः विपत्तिकाले चित्तः महतां उद्विग्नतां चञ्चलतां प्राप्नोति। जगत्यस्मिन् मानवः प्रायः सर्वेषु कार्येषु विपत्तिनां सामुख्यं लभते। यदि मानवः किञ्चित् महत्कार्येषु कर्तुं चिकीर्षति प्रवृतः भवति तर्हि तेषु कार्येषु निमित्तं धैर्यगुणस्य अनिवार्यरूपेण आवश्यकता वर्तते। धैर्यम् एव एषः गुणः यः विपत्तिकाले मनुष्यं सन्मार्गं दर्शयति। विश्वे अस्मिन् यावन्तः महापुरुषाः जाताः तेषां असाधारणं धैर्यमासन्। धैर्यवतः मनुष्यस्य चित्तः संकटकाले विपत्तिकाले वा चञ्चलः न भवति अपितु सः शान्तचित्तेन कर्तव्य-अकर्तव्यस्य विषये निश्चयं करोति। ततः एव गुरुत्तमाः अपि विघ्नाः धीराणां समक्षे लघुतां प्राप्नुवन्ति विनश्यन्ति च। अतः सफलजीवनस्य कृते धैर्यस्य धारणं अत्यावश्यकं वर्तते। एतां भावनां मनसि कृत्वा दिल्लीसंस्कृताकादमी नियमितरूपेण बालसाहित्युपेतां संस्कृतचन्द्रिकां बालपत्रिकारूपेण प्रकाशयति।

संस्कृताध्येतॄणां विद्यार्थीनां समक्षं संस्कृतचन्द्रिका-मासिकी-बालपत्रिकायाः द्वादशतममवर्षस्य जूनतः जुलाई २०२६ पर्यन्तमम् प्रकाशितः संयुक्तांकः(११-१२)सर्म्पयते। संयुक्तांकेऽस्मिन् डॉ. हर्षदेवमाधवमहोदयस्य एका कविता 'राष्ट्रस्य हृदयम्,' तथा एका लघ्वीकथा 'षड्यन्त्रम्', डॉ. मंजूलताशर्ममहोदयानां कविता 'अस्माकं तीर्थानि', प्रो. शुकदेवशर्ममहोदयनां कतिपयानां शब्दानां निस्पत्तिः व्युत्पत्तिः वा 'क्षणिका-द्वौ', डॉ. एन.के.सुन्दरेश्वरन्महोदयस्य कविता 'कवनकुसुमगुच्छः', डॉ. देवीसहायपाण्डेयस्य ईशवन्दना 'परब्रह्मवन्दनम्', प्रो. सुन्दरनारायणझा महोदयेन रचिता श्रीरामवन्दना 'श्रीरामदशकम्' डॉ. रामकिशोरस्य मातृभूमिवन्दना 'मातृभूमिः' तथा च एका लघुकथा 'सुकन्या', डॉ. राकेशशास्त्री-महोदयस्य बालकथाद्वयम् 'एकतायाः बलम्' एवं 'रजतस्य प्रभावः' अपि च एका एकांकीलघुनाटिका 'लोभः' तथा च डॉ. शारदागाडगे महोदयानां कथाद्वयम् 'मन्दारः' एवं 'स्वप्ने विश्वासः न कार्यः', डॉ. युवराजभट्टराईमहोदयस्य कविता 'किमस्ति यन्त्र दृष्यते सखेऽत्र दूरभाषे' इत्यादयः रचनाः प्रकाशिताः सन्ति। सर्वाः बालरचनाः विद्यार्थीनां जिज्ञासूपाठकानां कृते अतीव रोचकाः संस्कृते रुचिवर्धकाः वर्तन्ते। लेखकैः अपि अनुरोधः क्रियते यत् बालकेषु सृजनशीलता-भाषाकौशलं च वर्धयितुं नूतनानि लेखनानि प्रेषयन्तु। आशासे बालपत्रिकेयं बालकैः सोत्साहं च पठिष्यत इति।

भावत्कः

शकाब्दः १९४८(आषाढ-शुक्ल-एकादशी) ***(शैलेन्द्रकुमारसिंहः)***

देवशयनी-एकादशी सचिवः

राष्ट्रस्य हृदयम्

-डॉ. हर्षदेवमाधवः

मम राष्ट्रस्य ध्येयसिद्धिस्वप्नोऽस्ति
ध्यानचन्द्रस्य होकीयष्टौ।
मम देशस्य गोवर्धनधारणक्षमताऽस्ति
'मीराबाईचानु'हस्तयोः।
मम मातृभूमेस्स±ल्पसाफल्यमस्ति
नीरजचोपड़ाभल्लक्षेपे।
मम जन्मभूमेर्विश्वासधावनमस्ति
पी.टी.उषाचरणयोः।



मम जन्मभूतधात्र्या
अदम्या गतिरस्ति
मिल्खासिङ्घस्य प्रयत्नेषु।

मम पुण्यभूमेर्दीव्यता गायति
बि±मचन्द्रलेखनी।
मम जन्मदात्री गर्जति शतकोटिस्वरैः
रवीन्द्रनाथशब्देषु।
अलभ्याऽस्ति मे पवित्रा भूमिः
पापयोनिषु।

अश्रान्ताऽस्ति मे प्राणधात्री
सैनिकानां शौर्ये।
अक्लान्ताऽस्ति मे भाग्यविधात्री भूमिः
श्रमिकाणां बाहुषु।
अम्लानाऽस्ति नारायणी भूमिः

* ८, राजतिलक बंगलो, आबादनगरम्, बस स्थानकस्य समीपे, अहमदाबादः-३८००५८

कृषकाणां परिश्रमे।
अदीना अदितिरस्ति मे पुण्यभूमि-
स्तपोवनसंस्कृतिप्रसारे।
अगोचरा खलु देवभूमिर्मे

शत्रूणांस्वप्नप्रदेशेष्वपि।
यदि न विश्वसिषि
तर्हि
भारतीयानां वक्षः स्थलेषु
कर्णौ निधाय शृणु
यत्र स्पन्दते
मम राष्ट्रस्य हृदयम्।



सुकन्या

-डॉ. रामकिशोरमिश्रः

सुकन्या राज्ञः शर्यातेः सुन्दरी सुताऽऽसीत्। एकदा राजाऽऽखेटकाय सिंहं हन्तुं वनं गतः, तदा सः स्वपुत्रीमपि सह निनाय। तत्र वने महर्षिच्यवनस्तपस्यासंलग्न आसीत्। राज्ञा सह गता सेना वने बहूत्पातमकरोत्। सा च्यवनस्य मृदावृते काये लोष्ठानक्षिपत्। सुकन्याऽपि तस्य च्यवनस्य नेत्रे कुशेनाऽऽन्दधत्। ततस्तदृषिकोपेन सेनाया मतिर्भ्रष्टाऽभूत्। सैनिकाः परस्परं युद्धमारभन्त। राजा कुपितर्षिपार्श्वं गत्वा क्षमामयाचत्।

च्यवनर्षिणोक्तम्-राजन्! तव सैनिकक्षिप्तलोष्ठैर्मम शरीरं क्षतं विक्षतञ्चाऽभवत्। तव पुत्र्या कुशेन मे नेत्रे-ऽप्यन्धिते। अतो मे शरीरसेवायै निजकन्यां मह्यं देहि। ततो राजा शर्यातिस्तस्य सेवायै तस्मै स्वसुतां सुकन्यां ददौ। सुकन्याऽपि तत्पत्नी भूत्वा तस्य सेवामारभत्। वने भ्रमन्तौ तत्सौन्दर्यमवलोक्याऽश्विनीकुमारौ मोहितौ। ताभ्यां कथितम्-अयि सुन्दरि! त्वमेनं वृद्धं परित्यज्याऽऽवयोरेकं स्वपतिं वृणीष्व, येन स्वजीवनसुखं सम्यक्प्राप्नुहि।

त्योर्वचनं श्रुत्वा सुकन्योवाच-प्रभो! यस्मै मां पिताऽदात्तं नैव हास्यामि। तां पतिव्रतां विज्ञाय तौ देववैद्यौ प्रसन्नौ भूत्वा कथितवन्तौ- त्वमामलकीप्राशं स्वपतिं खादय, येन कतिपयदिनैस्तव पतिर्युवा भविष्यति।

सुकन्या तयोर्वचनाऽनुसारं तत्सर्वमकरोत्। तत् आमलकीप्राशं प्रतिदिनं भक्षयित्वा च्यवनेन नवयौवनं प्राप्तम्। स आमलकीप्राशश्च्यवनप्राशनाम्ना प्रसिद्धोऽभवत्। तस्य प्राशस्य निर्मात्री सुकन्याऽऽसीदिति मे मतम्।



-द्वारा श्रीसौरभमिश्रः, २९५/१४ पोरामपुरम्, खेकड़ा, (बागपत) उत्तरप्रदेशः

क्षणिकाः -७

*-प्रो. शुकदेवः शर्मा**

१. अ३ नम् (आंगन.)

अ३णं प्रा३णं गृहाग्रप्रदेशो वा

अ३नं

यत्र-

अ३न्ति परिभ्रमन्ति उपविशन्ति वा

स्थविराः।

(√अ३.भ्वा+ल्युट्.)

२.१ अ३ ना (-सुन्दर स्त्री)

मनोज्ञा लावण्यवती सुन्दरी वा

अ३ना

याम्-

प्रशंसन्ति श्लाघन्ते शालन्ते बहुवदन्ति वा

सर्वे।

(√अ३.+न+टाप्.)



२.२ अ३ ना (-सुन्दर स्त्री.)

शोभना कान्तिमती मनोहारिणी वा

अ३ना

यस्याः-

सन्ति भवन्ति विद्यन्ते अवलोक्यन्ते वा

प्रशस्तानि रम्याणि अ३नि।

(अ३+ न+ टाप्.)

३. अ३ न् (वि. जीवधारी.)

प्राणिन् देहिन् शरीरिन् जीविन् प्रमुखो वा

अ३न्

यः-

अ३ति विचरति परिभ्रमति व्यवहरति वा

अ३ैः शरीरावयवैः।

(√अ३+भ्वा.+इन्)

४. अङ्गुलिः (-लयः)

अङ्गुली अङ्गुरी अङ्गुलिका वा

अङ्गुलिः

या-

अ३ति प्रचलति धावति द्रुतं याति वा

झटिति वस्तुग्रहणाय।

(√अ३.भ्वा+उलि.)



५. अचरः (-पहाड़)

अचलो गिरिः आद्रिः हिमालयो वा

अचरः

यः-

न चरति न विचलति न स्पन्दते न क्रमते वा

स्थैर्यधर्मत्वात्।

(नञ् +√चर.भ्वा+ अच्.)

.



* *अतिथि आचार्यः,विÂवेÂरानन्द वैदिक-शोध-संस्थानम्, साधु-आश्रमः, होशियारपुर- १४६०२१, पञ्जाबप्रदेशः*

६. अचित् (वि.-मूर्ख.)
अतिगव: अचित्तो वैधेय: अचेतनो वा
अचित्
य:-
न चेतयते न विजानाति न बुध्यते वा कार्यक्रियाम्।
(नञ्+√चित्. चुरा.+ क्विप्.)

७. अचिर: (वि.)
क्षणिको क्षणिन् अस्थायिन् क्षण भङ्गुरो वा
अचिर:
य:-
न चिरायति न तिष्ठति न भवति न जीवति वा चिरं बहुकालम्।
(नञ्+√चर् चुरा.+अच्; चिरायति ना. धा. वा.)

९. अच्युत: (वि.-विष्णु.)
अनश्वरो निर्विकारो नित्यस्थायिन् अविनाशिन् वा
अच्युत:
य:-
न च्योतति न च्यवते न चेलति न विचलति वा स्वस्वरूपात्।
(नञ् +√च्युत्.भ्वा+क्त; क वा.)




१०. अज: (वि.)
अजन्मन् शाश्वतो नित्य: आत्मन् वा
अज:
य:-
न जायते नोद्भवति नोत्पद्यते न घटते वा नित्यस्वभावात्।
(नञ् +√जन्. दिवा+ड)

क्षणिकाः -८

१. अजगरः (-बड़ा साँप)

अहिपतिः फणिन् पन्नगः पवनाशनो वा
अजगरः
यः-
गिरति निगलति भक्षयति वा
अजां स्वोदरपूर्तये।
(अजा+√गॄ क्र्यादि.+अच्+ह्रस्व¨.)





२. अजम्भः (वि.-मेंढक)

प्लवो गाढवचो मण्डूको दन्तहीनो वा
अजम्भः
यस्य-
नास्ति न भवति न वर्त्तते वा
जम्भो दन्तावलिः।
(नञ्. √जम्भ्. भ्वा+ अच्.)

३.अजहल्लि³ म् (वि.)

लक्षणं प्ररूपं भेदकं प्रतीकं चिह्नं वा
अजहल्लि³
यस्मिन्-
न जहाति न परित्यजति न विपरिणमते वा
शब्दो निजलि³म्।
(नञ्+√हा. जुहो.+ शतृ+ लि³ . अच्.)

४. अजानिः (-जिसकी पत्नी दिव³ त हो.)

अपत्नीको विधुरो भार्याहीनो वा
अजानिः
यस्य-
नास्ति न विद्यते न भवति वा
जाया पत्नी।
(नञ्+जायाः+जायायाः निङादेशः)

५. अञ्जनम् (-काजल.)

अक्षिरञ्जनं नेत्राञ्जनं अक्षिलेपनं वा
अञ्जनं
येन-
अञ्जन्ति रञ्जयन्ति लिम्पन्ति वा
नेत्रे लावण्यलाभाय।
(√अञ्ज्. रुधा. ल्युट्+अन.)



* *अतिथि आचार्यः,विÂवेÂरानन्द वैदिक-शोध-संस्थानम्, साधु-आश्रमः, होशियारपुर- १४६०२१, पञ्जाबप्रदेशः*

६. अञ्जलिः (-दोनों हाथों को मिलाना.)
करसम्पुटः संसक्तिः मेलनं सम्पर्को वा
अञ्जलिः
यया-
अञ्ज्यन्ते अञ्च्यन्ते सत्क्रियन्ते वा
स्नेहिनो वृद्धाश्च।
(√अञ्ज्.रुधा.+√अल्+ इन्.)



७. अटविः (-वी.)
वनी विपिनं काननं अरण्यानिर्वा
अटविः (-वी.)
यस्याम्-
अटन्ति परिभ्रमन्ति विचरन्ति
वन्याः निश्श±म्
(√अट्. भ्वा.+अवि; ङीष् वा.)

८. ओालिका (-महल.)
आेा भवनं प्रासादः उत्तु[3]ायतनं वा
आेालिका
यस्याम्-
अटन्ति विचरन्ति निवसन्ति वा
नृपादयो धनाढ्याः वा।
(आेाल्+ठक्+इक्+टाप्.)

९. अतन्द्रः (वि.-सावधान.)
सतर्क सचेतो निरलसो वा
अतन्द्रः
यस्य-
नास्ति न भवति न जायते
तन्द्रा आलस्यं कार्यकाले।
(नञ् +तन्द्रा+न. बहु.)

१०. अतर्कितम् (वि.)
अचिन्तितं आकस्मिकं अप्रत्याशितं अविचारितं वा
अतर्कितं
यत्-
घटते जायते सम्भवति वा
सहसा।
(नञ् + √तर्क्. चुरा.+ इतच्.)



कवनकुसुमगुच्छः

-डॉ. एन् के. सुन्दरेश्वरन्



कविः विकसितं कमलं प्रति-

नक्तं हि कान्तविरहेण सुदुस्सहेन
दुःखं यदुत्थितमहो तदलिच्छलेन।
अन्यैरलक्ष्यविधया हृदये निधाय
प्रातर्न गूहसि तदीक्षणजं प्रहर्षम्।।



यवीयान् डयते भ्राता चण्डांशुमभिलक्ष्य मे।
इति तप्तमना वीरः सम्पातिः सम्पतत्यसौ।।

अतिक्रान्तो महानध्वा गन्तव्यञ्च ततोधिकम्।
क्षणमत्र सुखं स्थित्वा श्रान्तिशान्तिं करोम्यहम्।।
इति स कृतमतिर्विह३राजः
कृतनिलयो गगने पिनद्धरज्ज्वाम्।
सुचिरमतिसुखं, प्रशान्तसादः
प्रतिगमनाय मतिं तनोति धीरम्।।



महान् लोकोपकारोऽयं क्रियते ''ट्रक्कु'' चालकैः।
यदपेक्षितमस्मभ्यं तत्सर्वं तैर्हि लम्भ्यते ।।

तदुक्तं परोपकारिणः इति।



या निशा सर्वभूतानां तस्यां जागर्ति चालकः।
यस्यां जाग्रति सर्वेऽपि चालकस्य तु सा निशा ।।
स्नेहोपहारा लघवोऽपि दत्ताः
प्रेम्णा प्रियैर्नोऽस्मदभीप्सितज्ञैः।
कालान्तरे सञ्जनयन्ति नूनं
सम्मिश्रभावान् हृदये स्ववेद्यान्।।

आचार्यः (सेवानिवृत्तः), संस्कृत विभागः, कालिक्कट् विश्वविद्यालयः, केरलराज्यम्-६७३६३५

परब्रह्मवन्दनम्

-डॉ. देवीसहायपाण्डेयः

अखिलेशं तं वयं नमामः।
यस्मात्तेजो लभते भानुः,
प्रज्वलनं गृहणाति कृशानुः।
आकाशो लभते विस्तारम्,
वायुः संप्राप्यते प्रचारम्।



चपला तस्माल्लभते दीप्तिं उच्छलनं च सिन्धुरुद्दामः।
अखिलेशं तं वयं नमामः।।

उच्चैः शैले हिमाच्छादनं प्रपातेषु दुन्दुभीवादनम्।
नद्यः तु[3]तर[3]नर्तनं प्रबलगभीरो भवति यत्स्वनम्।
अनवरुद्धधावनं विलोक्य महिमानं हृदये स्मरामः।
अखिलेशं तं वयं नमामः।

कृष्णारजनीं दिनमवदातं रञ्जितसंध्यां सितप्रभातम्।
फले मधुरिमा पुष्पे वासः सुमने हासः कस्यायासः?
निपुणरञ्जकः कुत्रनिलीनो मात्रप्रकटकृत्यं पश्यामः।
अखिलेशं तं वयं नमामः।

सद्वृत्तेदृढतामनुरक्तिं
निजकर्तव्यपालनेशक्तिम्।
धैर्यं मह्यं देहि विपत्तौ
भावं सभायाः सम्पत्तौ
मानवतायाः सेवावृत्तिं देहि देव! शरणं गच्छामः।
अखिलेश तं वयं नमामः।

-द्वारा श्री मनीषचन्द्रपाण्डेयः, लवकुश नगरम्, रामघाटः, अयोध्या, उत्तरप्रदेशः-२४१३३

श्रीरामदशकम्

-प्रो. सुन्दरनारायणझाः


श्रीविष्णुर्जगतीपतिर्मखतनुः स्वांशावतारक्रमे
त्रेतायां जगतीतले रघुकुले जातो मनुष्यो महान्।
धर्मो विग्रहवानयं समभवच्छ्रीरामचन्द्राभिधः
कौशल्यातनयो नरेषु परमो मुन्यादिसेवापरः ॥१॥



मर्यादापुरुषोत्तमः सुखकरः ख्यातोऽस्ति विश्वम्भरः
पूज्यो देवगणेषु साधुचरितः श्रीशम्भुना पूजितः।
विश्वामित्रमुनिः स्वयज्ञमभितः संरक्षणायोत्सुकः
राज्ञो द्वारि समागतो रघुवरं नेतुं स्वकीयाश्रमम् ॥२॥

राजा पुत्रयुगप्रदानसमये शोकेन ग्रस्तोऽभवत्
साकं तेन हि लक्ष्मणोऽपि चलितो रामानुजस्तीक्ष्णधीः।
मार्गे राक्षसवंशनाशनपरोऽहल्यां समुद्धार्य च
जानक्याः जनकेन कारितमखे शम्भोर्धनुं भक्तवान् ॥३॥

श्रुत्वैतच्चरितम्महद्दशरथो यात्रां चकार स्वयं
पुत्रैर्मन्त्रिगणैस्सहाश्रितजनैः श्रीजानकीप्राप्तये ।
श्रौतस्मार्त्तविधा विवाहसमये कन्याश्चतस्रो वृताः
पुत्रेभ्यश्च चतुर्भ्य मोदसहितो राजा ततश्चागतः ॥४॥



हर्षोल्लासपुरस्सरं सकुशलं सर्वेऽप्ययोध्यापुरीं
सम्प्राप्तास्तदनन्तरं दशरथो रामोऽभिषेक्तुं चितः।
दैवात्तद्दिन एव कोपकलुषारातीकनिष्ठाऽभवत्
कैकेय्याः हठशान्तये स्ववचनं राज्ञा परावर्तितम्॥ ५॥

श्रीरामाय ददौ वनं च भरतायान्वादिशद्राज्यकं
रामत्यागसमं न शोकमधुना सोढुं स दक्षोऽभवत् ।
हे रामेति वदंस्तदा नृपवरः स्वप्राणमप्यत्यजत्
सीतालक्ष्मणसंयुतो रघुवरोऽरण्ये च वासं व्यधात् ॥६॥

तत्रानेकसुकर्मपालनपरो रामो वने तिष्ठति
मर्यादावरपालने शुभमतिस्तस्यां स्थितौ सुव्रतः ।
दर्शं दर्शमनेकमाश्रममनु श्रीचित्रकूटस्थितं
तिष्ठन्द्वादशवर्षमेव सुधियो सन्तोषयत्सन्मुनीन् ॥७॥



विख्यातं गहनं वनं त्वतिबलैरात±तं दण्डकं
संवासं कृतवान् स राक्षसदलं सद्दण्डदाने क्षमः।
रक्षो भीतिनिवारणे कृतमतिः श्रीरामचन्द्रो महान्
सर्वैरेव सुरर्षिभिर्नृपसुतः सम्पूजितोऽभूद्वरः॥ ८॥

सीतायाः हरणं ततः समभवत्प्रायोजको रावणः
गृध्रश्चैतदुवाच ते हनुमतः सङ्गोऽभवत् सौख्यदः।
किष्किन्धागमनं विभीषणसुहृद् युद्धाय वार्ता ततो
लङ्काया दहनं विनष्टमसुरप्रान्तं समस्तं तदा ॥९॥

अन्ते रावणनाशनादिविधिना सम्प्राप्य सीतां शुभां
सर्वैर्भक्तजनैस्सहाशु तान्निजपुरीमागत्य राज्यश्रियम् ।
सम्प्राप्याखिलविश्वपालनपरो सन्तुष्टचेता मुदा
रामो भक्तजनार्तिहा सुखमयो संराजते भूतले ॥१०॥

इति

श्रीसीतारामार्पणमस्तु।



मातृभूमिः

-डॉ. रामकिशोरमिश्रः

मातृभूमे! नमस्तुभ्यं त्वं जनभारधारिका।
वसन्ति त्वदीये पृष्ठे विभिन्ना बहुप्राणिनः।।
रामकृष्णादयः सर्वे पृष्ठे ते लब्धजन्मनः।
अजयन् तव पृष्ठे तान् सर्वान् तेषां हि मातरः।।
कौशल्या त्वमसि भूमे! देवकी यशोदाऽपि वा।
व्यचरन् त्वयि युद्धेषु शिवाजी-प्रतापाऽऽदयः ।।
सावित्री तव पुत्र्यासीद्, यया सत्यवान् रक्षितः।
या यममन्वधावद् यः प्राणान् सत्यवतोऽहरत्।।
भरतः शाकुन्तलेय आसीत्तव सुरक्षकः।
यस्य नाम्नाऽस्ति देशोऽयं भारतनाम्ना विश्रुतः।।
वसिष्ठविश्वामित्राऽऽद्यास्तव पुत्रा महर्षयः ।
येषां तपोभिर्विख्याता दिशासु देवि! ते भुवः ।।
गान्धार्या देवि! ते पुत्र्या नेत्रपटबन्धः कृतः ।
पापहां ते सुतां ग३ां शिवो जटास्वधारयत् ।।



नमस्ते भारतमातः! नम्याः सन्ततयस्तव ।

-द्वारा श्रीसौरभमिश्रः, २९५/१४ पौरामपुरम्, खेकड़ा, (बागपत) उत्तरप्रदेशः

अस्माकं तीर्थानि

-डॉ मंजूलता शर्मा*



अयोध्यायां प्रभुः
रामः सीतया सह राजते।
अयोध्या सरयू-नद्याः तीरे पुण्यवती पुरी।।



काश्यां विराजते देवः,
विश्वनाथः उमापति।
काशीग३ानदीतीरे,
सदैव पापनाशिनी ।।



वृन्दावने च रासेशः, देवकीनन्दनः प्रभुः।
मथुरापि महातीर्थं,
पवित्रं यमुनातटे ।।

उज्जयिन्यां महाकालं ज्योतिर्लि३ंगं मनोहरम्।
शिप्रानदीतटे रम्या, उज्जयिनी पुरी शुभा।।



समुद्रस्य तटे पुण्या द्वारका नगरी तथा।
गुर्जरे रम्यदेशे सा आगच्छन्ति च यान्त्रिकाः।।



संस्कृतविभागाध्यक्षा, सेंण्ट जौन्स महाविद्यालयः, आगरा, उत्तरप्रदेशः

षड्यन्त्रम्

-डॉ० हर्षदेवमाधवः

बर्लीननगरस्य एकस्मिन् रहस्यमये स्थले पञ्चगुप्तचराः स[3]णकयन्त्रस्य पटले प्रेक्षमाणाः सन्ति। ते सन्ति पञ्चदेशानां गुप्तचराः। तेषु भारतदेशस्य 'रॉ' (Research And Anylisis Wing) संस्थायाः, अमेरिकादेशस्य 'फेडरल सिक्यूरिटरी एजन्सी' नाम संस्थायाः, जर्मनदेशस्य 'बीएनडी' (बुन्देस्ना चरिचटेंडिएन्ट) संस्थायाः, इझरायल देशस्य 'मोसाद' संस्थायाः, फ्रांस देशस्य 'फेडरल सिक्यूरिटी एजेन्सी संस्थायाः' प्रमुखाः गुप्तचराः। ते सहसा उत्थाय नृत्यन्ति। स[3]णक-यन्त्रपटले नवीना वार्ता आगता यद् अमेरिकादेशस्य धनकुबेरः ''डिलोन-डस्क'' इति नामकः 'हेलिकोप्टर'-दुर्घटनायां मृतः। अयं विश्वस्य पञ्चमः धनकुबेर आसीत्। अतः पूर्वं रशियादेशस्य 'क्रीस्टोफरः' नामकः धनकुबेरः समुद्रे प्लवदुर्घटनायां मृतः। चीनदेशस्य 'हेन यांग'' नामकः धनकुबेरः तस्य कार्यालये विस्फोटान् मृतः। भारतस्य 'ललित-अदाणी' नामकः धनकुबेरः मार्गे सहसैव द्रुतगतेः कारयानस्य दुर्घटनायां मृतः। फ्रान्सदेशस्य 'ला-बेलैक' नामकः धनकुबेरः तस्य गृह एव अगम्यकारणवशात् पञ्चत्वं गतः।

गुप्तचराः एतान् सर्वान् जानन्ति। गुप्तचरेषु 'अजीत-रस्तोगी' नामकः भारतीय गुप्तचर अवदत्-हन्त! क्रियासिद्धिर्जाता। पञ्चमः नरपिशाचोऽअपि मृतः। अस्माकं कार्यं सम्पन्नम्। विश्वमधुना भयमुक्तं जातम्।


विश्वस्य प्रमुखदेशानां गुप्तचराः एकत्र भूत्वा कस्माद् एतान् अघ्नन् इति प्रश्नः विचारणीयः। त्रिवर्षेभ्यः पूर्वं सान्फ्रांसिस्कोनगरे एकं विश्वधनकुबेराणां वाणिज्यविषयकं सम्मेलनमभवत्। ते सर्वे विश्वस्य दुर्दशाविषये चिन्तिता आसन्। सर्वत्र महार्घता वर्धते स्म। खाद्यवस्तूनां न्यूनतापि अलक्ष्यत। वस्तूनां यावद् उत्पादनमभवत् तावत् तस्य विक्रयो नाऽभवत्। अतः विश्वस्य अर्थव्यवस्था असमीचीना आसीत्। 'डिलोन-डस्क' महोदयो धनकुबेराणां प्रमुख आसीत्। सः पत्रकारपरिषदि घोषणां कृतवान् यद् विश्वस्य अर्थव्यवस्थायाः, दुर्दशायाः कारणं जनसंख्या-विस्फोटोऽअस्ति। यावती जनसंख्या वर्धते, तावती तेषां मरणसंख्या नास्ति। अधुना जनानां जीवनकालः वृद्धिं गतः। अतः विश्वस्य देशैः जनसंख्यां नियन्तुं प्रयत्नः कर्तव्य इति। सम्मेलनं तु पूर्णतां गतम्।

ततः पश्चाद् अष्टमासाः व्यतीताः। सहसैव चीनदेशात् कापि महामारी समुत्पन्ना। वायुवेगेन सा महामारी विश्वस्मिन्नपि विश्वे प्रासरत्। केवलं मासत्रयावधौ अगणिता मानवाः प्राणिनः च पञ्चत्वं गताः। समग्रापि अर्थव्यवस्था भग्ना। विश्वस्य वैज्ञानिकैः असङ्ख्याः प्रयोगाः कृताः। किन्तु रोगोऽयम् अगम्य आसीत्। प्रतिदिनं रोगो वर्धते स्म। विश्वस्य सर्वे देशाः अर्थाभाववशाद् अनर्थतां गताः। तदा पुनरपि एतेषां धनकुबेराणां सम्मेलनमभवत्। सर्वैः धनकुबेरैः विश्वं त्रातुम् एका योजना उद्घोषिता। तैः सर्वदेशेभ्यः पञ्चडॉलरमितेन कुसीदेन (सरलवृद्धिरूपेण गृहीत्वा) धनम् ऋणबन्धरूपेण दातुं कुसीदेन निश्चयः कृतः। तैः विश्व-आरोग्यसंस्थायै अपि ऋणबन्धः दत्तः। तदैव चीनदेशस्य एकेन औषधानुसन्धानकेन्द्रेण एनं रोगं नाशयितुं किञ्चिदौषधं निर्मितम्। विश्व-आरोग्यसंस्थया इदमौषधं सर्वेभ्यो देशेभ्यो विना मूल्यं प्रदत्तम्। इत्थं रोगो नियन्त्रितो जातः।

ततः पश्चात् पञ्चमासेभ्यः विश्वस्य राजनीतिज्ञानाम् एकं गुप्तं सम्मेलनं जातम्। ते सर्वे सहसैव महामारीणां समुद्भवं ज्ञातुं व्यचारयन्। गुप्तचरसंस्थाभिः ज्ञातं यद् वस्तुतः महामार्यो धनकुबेराणां षड्यन्त्रवशात्समुत्पन्ना आसन्। ते गुप्तप्रयोगान् कारयित्वा महामार्याः विषाणुन् उत्पादितवन्तः। महामारीवशात् सर्वे देशाः निर्धना भवेयुः। समृद्धदेशा अपि ऋणबन्धान् स्वीकर्तुं परवशा भवेयुः। धनकुबेराः परोपकारिणो भूत्वा धनं दत्त्वा धनवृद्धिं कृत्वा अधिकतराः समृद्धा भवेयुरिति तेषां गुप्तविचारणा आसीत्। अतः पञ्चदेशानां गुप्तचराः तान् नरपिशाचान् हन्तुं एकत्र जाताः। तैः शनैः-शनैः पञ्चधनकुबेराणां नाशो विहितः।

जर्मनीदेशस्य गुप्तचरः अवदत्-'समग्रं विश्वं स्वार्थप±मग्न जातमासीत्। एते धनाढ्याः धनवृद्धिं कर्तुं विश्वस्य प्रजानां नाशं कृतवन्तः। रोगाणामुपयोगः विज्ञानप्रयोगैः रोगमुत्पाद्य प्रजानां नाशार्थमभवत्। एतैः पृथिव्यामेव नरकमानीतम्। वयस्याः! अस्माकं कार्यं सम्पन्नम्। ईश्वरं प्रार्थयन्तु यत् पुनरपि अन्यान् नरपिशाचान् पञ्चत्वं गमयितुम् अस्माकं मेलनं न भवेत्।'





एकतायाः बलम्

-डॉ. राकेशः शास्त्री *

एकस्मिन् वने द्वौ वृषभौ निवसतः स्म। तयोः घनिष्ठमित्रता आसीत्। तौ क्षणम् अपि पृथक् न अभवताम्। अनेन सम्पूर्णे वने प्राणिषु तयोः अतीव प्रभावः आसीत्। सर्वे प्राणिनः भीताः आसन्। सिंहः अपि तयोः समीपं गन्तुं साहसं न करोति स्म।

कोऽपि प्राणी यदि एकस्मिन् वृषभे आक्रमणं कुर्यात् तर्हि अन्यः वृषभः स्वतीक्ष्ण शृङ्गैः तं क्षतदेहं करोति स्म। अनेन व्याकुलः सः प्राणी स्वप्राणान् रक्षितुं पलायनमतिः भवति स्म ।

तस्मिन् वने स्थितः एकः सिंहः सदैव ताभ्याम् ईर्ष्यति स्म। तस्य प्रबला इच्छा आसीत्, यत् सः तयोः सरसेन मांसेन स्व क्षुधायाः शान्तिं कुर्यात्। एतदर्थं तेन बहुशः प्रयासः अपि कृतः, किन्तु तयोः एकतायाः समक्षे सः निरुपायः अभवत्।

तस्मिन् एव वने एकः शृगालः अपि निवसति स्म। एकदा सः सिंहस्य समीपम् आगत्य अवदत्-'राजन्! भवान् एतयोः वृषभयोः सरसं मांसं भक्षयितुं वाञ्छति। अहं भवतः साहाय्यं करोमि।'

सिंहः उवाच - ''इच्छा तु वर्तते मे, किन्तु सफलं न भवामि।''

Ãगालः उक्तवान्-''पश्यतु भवान्, अहम् एतत् कथं सम्पादयामि। भवान् तु एतयोः सरसं मांसं भक्षयितुं सज्जः भवतु।'' एतत् उक्त्वा सः एकस्य वृषभस्य समीपं गत्वा अवदत्- 'सुहृद्! अपि कुशली भवान्। अद्यत्वे किञ्चिद् निर्बलः प्रतीयते, तव मित्रं तु संपुष्टम् दृश्यते। एतत् आभाति यत् सः स्वयमेव सर्वं हरितं सस्यं खादति, त्वदर्थं च निःसारं सस्यं त्यजति, इति।

Ãगालस्य वचनं श्रुत्वा वृषभः अवदत्-''समीचीनं कथयति भवान्, अहम् अपि एतत् अनुभवामि। सः सदैव मम उपेक्षां करोति।''

एवमेव तेन Ãगालेन अन्यं वृषभं प्रति कथितम्। अन्यः वृषभः अपि तस्य कथनस्य समर्थनम् अकरोत्। तस्मात् एव दिवसात् तौ पृथक्-पृथक् जातौ। एकः अपरं प्रति न पश्यति स्म। एतस्मिन् अन्तरे अवसरं लब्ध्वा सिंहेन एकः वृषभः आक्रान्तः। तस्मिन् समये दूरे स्थितः अन्य वृषभः पश्यति स्म। तेन तस्य साहाय्यं न कृतम्, नैव तस्य सिंहस्य विरोधः कृतः।

तं वृषभं हत्वा तेन सिंहेन स्व क्षुधायाः तृप्तिः कृता। एवमेव अन्यस्मिन् दिवसे तेन अन्यः वृषभः अपि घातितः। एवम् एकतायाः अभावे तौ उभौ एव विनष्टौ ।

सत्यमेव कथितं केनापि - ''संघे शक्तिः कलौयुगे।''

-सेवानिवृत्त-संस्कृत-विभागाध्यक्षः, श्रीगोविन्दगुरुराजकीयमहाविद्यालयः,
बाँसवाड़ा, राजस्थानम्-३२६००१, (१ जे, ३८ हाउसिंग-बोर्ड-कालोनी, बाँसवाड़ा, राजस्थानम्)

रजतस्य प्रभावः

एकस्मिन् नगरे एकः श्रेष्ठी प्रतिवसति स्म। सः अतीव धनवान्, किन्तु कृपणः आसीत्। स्वधनात् सः एकम् अपि पणकं न ददाति स्म। कोऽपि भिक्षुः यदि तस्य समीपम् आगच्छति स्म, सः तस्य तिरस्कारं करोति स्म। न केवलम् एतावत् स्वपरिवारे अपि सः धनव्ययं न करोति स्म। अनेन सर्वे तं प्रति घृणाभावं धारयन्ति स्म, किन्तु अभिव्यक्तिं न कुर्वन्ति स्म ।

एकदा एकः साधुः तत्र आगच्छत्। श्रेष्ठी भीतः आसीत्, कदाचित् एषः किञ्चित् याचनं न कुर्यात्। अनेन सः तेन सह वार्ताम् अपि न अकरोत् । भीतः सः अन्यं स्थानं प्रति गन्तुं प्रवृत्तः अभवत्।

एतत् दृष्ट्वा सः साधु अवदत् – ''भो श्रेष्ठिन्! कथं भीतः असि? धनं तव ग्रहीतुं न आगतवान् अहम्। केवलं तव वैभवमहिमानम् एव द्रष्टुम् अहम् आगच्छम्।

स्व प्रशंसां श्रुत्वा श्रेष्ठी अतीव प्रसन्नः अभवत्, तस्य समक्षं स्वसम्पन्नतायाः च अतिशयितं वर्णनं कृतवान् । किञ्चित् कालं यावत् साधुः सर्वं श्रुतवान् गाम्भीर्येण। तदैव अकस्मात् सः उदतिष्ठत् गवाक्षं प्रति च अचलत् । संभ्रमितः श्रेष्ठी अपि तदनु गवाक्षसमीपम् आगच्छत्।

गवाक्षः काचयुक्तः आसीत्। साधुः श्रेष्ठिनम् अवदत्–भवान् गवाक्षात् बहिः किं पश्यति ? सः किमपि न अवागच्छत् । पुनरपि अकथयत्– 'श्रीमन्! बहिर–सर्वम् अपि दृश्यते–वृक्षाणि मार्गः तत्र गच्छन्तः जनाः च।

एतत् श्रुत्वा सः साधुः तत्रैव स्थिते मानवपरिमित–दर्पण–समक्षे स्थितवान् उवाच च ''अत्र किं पश्यति भवान्?'' आश्चर्यचकितः श्रेष्ठी उक्तवान् –'अत्र अहं स्व सम्पूर्णं शरीरं पश्यामि, श्रीमन्!'

तदा साधुः शान्तस्वरेण अवदत् –'भोः श्रेष्ठिन्! गवाक्षेऽपि काचः वर्तते, अत्रापि च। किन्तु अस्मिन् काचे रजतमिश्रणं सञ्जातम्। अतः भवान् केवलं स्वम् एव पश्यति, न अन्यत् तत्र च भवान् रजताभावे सर्वं सम्यक्रूपेण अवलोकयति।'

अतः मानवस्य समीपे यदा रजतस्य (धनस्य) आगमनं भवति, तदा सः अन्यं कमपि न पश्यति। स्व धनम् एव सर्वस्वम् अवगच्छति, अनेन सेवात्यागयोः अभावे तस्य सर्वे मार्गाः अवरुद्धाः भवन्ति।

तस्य तत् वचनं श्रुत्वा श्रेष्ठिना तस्य चरणौ गृहीतौ। तस्मात् एव दिवसात् सः उदारतापूर्वकं धनदानं तस्य व्ययं च अकरोत्।



मन्दारः

*-डॉ. सौ.शारदा गाडगे**

आसीत् रामपुरे मन्दारनामधेयः कश्चित् बालकः। सः एकदा मित्रैः सह प्रदर्शनं द्रष्टुं प्रस्थितः। तदा तस्य पिता कार्यालये आसीत् माता च तस्याः शालायाम्। गृहे तस्य पितामहः एव आसीत् एकलः। सः मन्दारम् अवदत्- 'वत्स' सावधानतया गच्छ, शीघ्रं च आगच्छ गृहम्।'

मन्दारः प्रदर्शनस्थलं प्राप्तः। तत्र सर्वाणि आपणानि तेन निरीक्षितानि। अनन्तरं ते सर्वे आकाशदोलाम् आरोढुम् उत्सुकाः। किन्तु तदा मन्दारः पितामहम् अस्मरत्। 'तत्र भवान् गृहे एकाकी अस्ति, नास्ति कोऽपि अन्यः तस्य कार्याणि कर्तुम्, सः मां प्रतीक्षेत' इत्यनेन विचारेण सः तस्मात् स्थानात् निर्गतः गृहं प्रति प्रस्थितः। मार्गे स्थित्वा तेन कानिचन फलानि क्रीतानि, ग्रन्थालयात् पुस्तकानि च गृहीतानि। मित्राणि आपृच्छ्य यदा सः गृहं प्राप्तः तदा तस्य पितामहः द्वारे एव तं प्रतीक्षमाणः स्थितः आसीत्। मन्दारं दृष्ट्वा सः आनन्दितः अभवत् अनुक्षणमेव तस्य नेत्रयोः अश्रुधाराः निःसृताः। मन्दारस्य केशान् स्वकीयेन जीर्णहस्तेन स्पृष्ट्वा सः तस्य कपोलं चुम्बितवान्। मन्दारः अपृच्छत् - ''पितामह, किमर्थं भवान् रोदिति?''

तस्य प्रश्नं श्रुत्वा सः अवदत्-''वत्स, इदानीमेव दूरदर्शनयन्त्रे इदं वाक्यं मया पठितं यद् यत्र त्वं गतवान् तत्रस्थः आकाशदोला भग्ना, कतिपयबालकाः विद्धाः इति। अतः सा एव चिन्ता आसीत् मे मनसि। मनः यद् चिन्तयति तद् वैरी अपि न चिन्तयति इति सत्यमेव।'' इति उक्त्वा सः पुनः पुनः मन्दारस्य कपोलं चुम्बितवान्। ''रक्षितोऽहं भवतः प्रेम्णा'' इति उक्त्वा मन्दारः अपि तम् आलि[3]तवान्।



- ११ बी, भांगे विहारः, त्रिमूर्तिनगरम्, नागपुरम्, महाराष्ट्रम्-४४००२२

स्वप्ने विश्वासः न कार्यः

आसीत् कस्मिंश्चिन्नगरे सुधर्मनामधेयः दशवर्षीयः बालकः। तस्य निद्रा अतीव प्रिया आसीत्। निद्रायां दृष्टाः स्वप्नाः तस्मै अतीव अरोचन्त। प्रातःकाले उत्थाय सः स्वस्वप्नान् वर्णयति स्म। तेषु विश्वस्य तथैव आचरति स्म। एकदा तेन स्वप्नः दृष्टः यद् तेन भूमिगतं धनमधिगतम्। अन्येद्युः सः उत्थाय गृहस्य अ३णम् अखनत्। किन्तु धनं न प्राप्तम्। अतः सः निराशः अभवत्। तस्य माता तम् अवदत-वत्स, स्वप्नेषु विश्वासः न कार्यः। किन्तु सः मातरं नागणयत्। तस्य एष स्वप्नविश्वासः प्रतिदिनम् अवर्धत। तस्य माता चिन्ताग्रस्ता अभवत्। एष स्वप्नप्रियः बालकः कथं क्रियाशीलः भवेत् इत्येव तस्याः चिन्ता आसीत्। भूरि चिन्तनं कृत्वा तथा कोऽपि उपायः कल्पितः। साऽपि प्रतिदिनं सुधर्मं स्वप्नं कथयितुमारभत। सुधर्मः मातुः सम्भाषणे आनन्दमन्वभवत्।

एकदा सुधर्मस्य माता सुधर्ममवदत्-वत्स, गतदिने मया नवः स्वप्नः दृष्टः। स्वप्ने मया त्वं भूरि ताडितः तथैव न भोजितः। अतः अद्य अहं तव कृते पाकसिद्धिं न करोमि। ताडयितुं च इच्छामि।

एतद् श्रुत्वा सुधर्मः अवदत्-अम्ब, मा ताडयतु माम्।

माता अवदत्। कथं न ताडये। त्वमेव वदसि यद् यद् स्वप्ने दृश्यते तद् तद् सर्वं प्रत्यक्षीभवति इति। त्वमेव वदसि नु प्रतिदिनम्। अतः अद्य त्वं मया ताडनीयः एव। नास्ति कोऽपि पर्यायः।

सुधर्मः अवदत्-अम्ब, स्वप्ने विश्वासः न करणीयः इति त्वया एव अहं शिक्षितः नु? किन्तु त्वं स्वयमेव स्वप्नवत् आचरसि। अम्ब, मा ताडय माम्। अवगतः मया मम प्रमादः। अग्रे अहं स्वप्ने विश्वासं न करिष्यामि। पुत्रस्य दृढनिश्चयं श्रुत्वा माता सन्तुष्टा अभवत् ।



किमस्ति यन्न दृश्यते सखेऽत्र दूरभाषके

-डॉ. युवराजः भट्टराई

पलं प्रपीड्यते मनो विलोक्य दूरभाषके,
क्षणान्तरे सुखानुभूतिरस्ति दूरभाषके
सुखासुखं क्रमेण भाव्यतेऽत्र दूरभाषके
सखे! शुभाशुभं समस्तमस्ति दूरभाषके ।।१।।



अभीष्टदृश्यदर्शनानि सन्ति दूरभाषके,
सुदूरलभ्यवस्तुजातमानयेत् समीपके।
विदेशवर्तिना समं लपन्ति दूरभाषके,
सुखाद्यभोजनादिकं सुलभ्यमत्र यन्त्रके ।।२।।

यशस्विता सुलभ्यते जनैश्च दूरभाषके,
चरित्रहानिरप्यहो! भवेच्च दूरभाषके
सुहृत्समागमा भवेयुरत्र दूरभाषके।
प्रव¨ना विधीयते तदत्र दूरभाषके ।।३।।

कथाप्रस³-स³ता सुतुष्टताथ रुष्टता,
मुदान्विता रुषान्विताः समस्तकथ्यभावनाः।
तथान्यसूचना भवन्ति यत्र दूरभाषके
विवेचनं न शक्यते किमस्ति दूरभाषके ।।४।।



सुकर्म-संरताः सुकर्मिणश्च दूरभाषके,
कुकर्म-संरताः कुकर्मिणश्च दूरभाषके।
तपोधनाः सुपुण्यशालिनोऽपि दूरभाषके,
समे सहैव स³ता मिलन्ति दूरभाषके ।।५।।

विवाहमन्त्रणा च शोकसूचनापि यन्त्रके,
कुलस्य वर्धनादिकं च सूच्यते सुयन्त्रके।
रुजा निपीडितेन सूच्यते च दूरभाषके,
किमस्ति यन्न दृश्यते सखेऽत्र दूरभाषके ।।६।।

स्वयौवनं हि यौवतेन हूयतेऽत्र यन्त्रके,
न शान्तिरस्ति मानसे विलोकनेन यन्त्रके।
अमूल्य कालयापनं मुधास्ति दूरभाषके,
शनैः शनैः गतं सुजीवनं हि दूरभाषके ।।७।।

दृगस्ति दूरभाषके वदन्ति दूरभाषके,
चलन्ति दूरभाषकेण दर्शिते शुभे स्थले ।
सुदुष्करं भवेद् यदीह चिन्तने विचारणे,
गवेषयन्ति तज्जनाः स्वकीयदूरभाषके ।।८।।



दिवानिशं निमज्जिता जनाश्च दूरभाषके,
करे निधाय लोकयन्ति किन्नु दूरभाषके ।
बुभुक्षितेऽपि भोजनाय यान्ति दूरभाषके,
नराश्च खेलने रताः भवन्ति दूरभाषके ।।९।।

युवानुरागिणो भवन्ति तेऽत्र दूरभाषके,
समन्विषन्ति रागिणीं सदैव दूरभाषके ।
मिथस्तया समं लपन्ति भूरि दूरभाषके,
महाप्रभावके रतिः कथं न दूरभाषके ।।१०।।

क्वचित् किमत्र जायते यथायथं प्रदर्श्यते,
सुदुष्करञ्च वेद्यते द्रुतं हि दूरभाषके ।।
सुदुर्लभोऽपि लभ्यते सखेऽत्र दूरभाषके,
ह्यसीमदूरता विनश्यते च दूरभाषके ।।११।।



महुर्मुहुः गणेषणेऽपि यद् बहिर्न लभ्यते,
क्षणेन तत् सुलभ्यते सदात्र दूरभाषके ।
पतन्ति रागबन्धने जनाश्च दूरभाषके,
समर्पणं विधीयते समैः सुदूरभाषके ।।१२।।

विपत्क्षणे सहानुभूतिरस्ति दूरभाषके,
सुखे पलेऽस्ति नन्दनं भृशं हि दूरभाषके।
स्पृहातर[3] घोषणास्ति दिव्यदूरभाषके,
मनो व्यथायते सखे! गते च दूरभाषके ।।१३।।

विचित्रचित्रणं क्वचित् प्रदर्शयन्ति यन्त्रके,
विहाय पुस्तकं जनाः पठन्ति दूरभाषके।
विनिन्दितं प्रशंसितं समस्तमस्ति यन्त्रके,
पठेद् भवांश्च काव्यमेतदत्र दूरभाषके ।।१४ ।।



स्वग्राम-जीवनस्य पौरजीवनस्य वृत्तदम्
जगत्तलस्य सूचनाप्रदं हि दूरभाषकम्।
पुरः पराजितं सुयन्त्रकस्य वृत्तपत्रकम्
जने जने जवेन वर्धतेऽत्र दूरभाषकम् ।।१५।।

सुदिव्यवस्त्रवेष्टिता दिगम्बराश्च तेऽवशाः,
स्त्रियो नराश्च नर्तनानि दर्शयन्ति यन्त्रके।
बसेऽथ रेलयानके पथे गते च चत्वरे,
जना विलोकयन्ति तानि चित्रकाणि यन्त्रके ।।१६

गृहे भवेत् पतिः परन्तु सुन्दरी तु यन्त्रके,
कुमारिकेव दृश्यते समं नरेण भाषणे।
स्त्रियो यथार्थमत्र गोपयन्ति दूरभाषके,
गृहे पतिव्रतापि सा चरेन्नरांश्च यन्त्रके ।।१७।।



नराश्च छद्मतां तथाऽऽचरन्ति दूरभाषके,
यथार्थगोपनेन ते स्त्रियस्तुदन्ति यन्त्रके।
अवैधता प्रवर्धते दिने दिनेऽत्र यन्त्रके,
करे करे प्रवञ्चनापणानि सन्ति यन्त्रके ।।१८।।

कथाकथि प्रवर्तते हसाहसि प्रवर्धते,
ततश्च चाटुवाक्यबन्धनेन सा विलोभ्यते।
प्रिया-सुतोषणाय यत्यतेऽत्र दूरभाषके,
प्रियाधरस्य चुम्बनं प्रसार्यतेऽत्र यन्त्रके ।।१९।।

दरिद्रता समृद्धता प्रकाश्यतेऽत्र यन्त्रके,
क्वचिद्भ्रमन्ति केऽधुना प्रसूचयन्ति ते समे।
क्व भुज्यते क्व गम्यते जनैस्तदत्र सूच्यते।
अतीव विस्मयोऽस्ति मे निरर्थकेऽत्र यन्त्रके ।।२०।।

अनेकरूपधारका नरा भवन्ति यन्त्रके,
दिवानिशं प्रव¨काः प्रव¨यन्ति यन्त्रके।
सदैव पश्यतोहरा धनं हरन्ति यन्त्रके,
न साहचर्यमस्ति भासनं सखेऽस्ति यन्त्रके।।२१।।

अहोऽस्थिकम्पके प्रशीतके हिमालये गते,
तथोष्ण-दक्षिणप्रदेशके मनोरमे गते।
तथा विलासितामये विदेश-दर्शने सखे!
धरन्ति चित्रकर्षणाय दूरभाषकं समे ।।२२।।



विपद्भिरर्दिता जना रुदन्ति दूरभाषके,
समुत्सवे रताश्च ते हसन्ति दूरभाषके।
विभिन्न-नाटकानि पुस्तकानि दूरभाषके,
ह्युपद्रवाश्च नृत्यगीतकानि दूरभाषके ।।२३।।

विशालवाङ्मयं मयाधीतञ्च दूरभाषके,
कवित्वकौशलं मया विलिख्यतेऽत्र यन्त्रके।
जनैः प्रपठ्य तच्च मे प्रतिक्रिया विधीयते,
सुरोचनाय यन्त्रके कराङ्गुलिः प्रणुद्यते ।।२४।।

लोभः

-डॉ. राकेशः शास्त्री

पात्र-परिचयः

माता - रमेशनामकस्य युवकस्य वृद्धा माता।

रमेशः - एकः अतीवसरलः विनीतश्च युवकः।

खगेशः - सी.आई.डी. विभागे रतः एकः युवकः, रमेशस्य मित्रम् ।

साधुः - प्रच्छन्नः धूर्तः वंचकः, बहुदिवसात् सी.आई. डी. वांछितः।

(मंचे यवनिका अनावृत्ती भवति)

माता - ***रमेशः! अत्रागच्छतु तावत्, आपणं गत्वा शतरूप्यकेण घृतम् आनय।***

रमेशः - ***अयम् आगच्छामि, अम्ब! घृतं च आनयामि आपणं गत्वा।***

(रमेशः अम्बातः शतरूप्यकाणि गृहीत्वा आपणं गच्छति धावन् खलु। मार्गे एकः साधुः तं आह्वयति।)

साधुः - ***वत्स! एवं धावन् कुत्र गच्छसि। अत्र आगच्छ, मम समीपम् उपविशतु तावत्।***

रमेशः - ***बाबा! अहम् शतरूप्यकेण घृतम् आनयामि आपणात्, अम्बार्थम्।***

साधुः - ***वत्स! यदि एवम् अस्ति, तर्हि शोभनम् अहम् तव शतरूप्यकाणि द्विगुणं करोमि, अनेन त्वं द्विगुणं घृतम् आनेतुं शक्नोषि स्व अम्बार्थम्। अनेन त्वं कीदृशम् अनुभविष्यसि?***

रमेशः - ***बाबा! अनेन तु अहम् अतीव प्रसन्नताम् अनुभविष्यामि, किन्तु बाबा! किम् एवं भवितुं शक्यते? किम् मम शतरूप्यकाणि द्विशतं भवितुं शक्नुवन्ति, भवत्प्रयासेन, अनुकम्पया वा?***

साधुः - (दृढविश्वासेन) ***वत्स! कथं न भवितुं शक्यते? अस्माकं तपसि महती शक्तिः वर्तते, वयं किमपि कर्तुं शक्नुमः, असम्भवमपि सम्भवम्।***

रमेशः - (औत्सुक्येन) ***यदि एवम् अस्ति बाबा! तर्हि भवान् मम शतरूप्यकाणि द्विगुणं करोतु। अनेन अहं स्व मातुरर्थं द्विगुणं घृतम् आनेतुं शक्नोमि, मम माता अनेन अतीव प्रसन्ना भविष्यति।***

साधुः - (रमेशस्य शतरूप्यकाणि स्व हस्ते निधाय) ***वत्स! क्षणं तावत् स्व नेत्रे निमील्य अत्र तिष्ठ।***

(रमेशः साधोः कथनानुसारं स्व नेत्रे निमील्य तिष्ठति, अस्मिन् कालान्तरे साधुः स्व समीपात् शतरूप्यकाणि तेन रूप्यकेण सह नियोजयति, स्वहस्तं च वायुमध्ये परिचाल्य मन्त्राणि कानिचित् बुद्बुदायते)

साधुः - ***वत्स ! इदानीं स्व नेत्रे अनावृते कुरु। तव रूप्यकाणि द्विगुणानि भवन्ति।***

(एवं उक्त्वा वायुमध्ये पुनः स्व हस्तं परिचालयति, मन्त्राणि च बुद्धदायते)

रमेशः - (आश्चर्य-मिश्रितेन स्वरेण वदति) ***सत्यं बाबा! मम रूप्यकाणि द्विगुणं भवन्ति?***

साधुः – (स्वमुष्टिम् उद्घाट्य) ***गृहाण, वत्स! इदं तावत् तव शतरूप्यकाणि द्विशतानि संजातानि ।***

(इत्युक्त्वा रमेशाय द्विशतरूप्यकाणि ददाति)

रमेशः – ***अस्तु बाबा! धन्यवादः अतीव अनुगृहीतोऽस्मि, भवत्कृपया अहं मातुरर्थं द्विगुणं घृतं नेष्यामि।***

(नेत्रे विस्फारिते कृत्वा कृतज्ञभावेन तानि द्विशतं रूप्यकाणि गृहणाति)

साधुः – ***सम्यक् अधुना त्वं गच्छ, स्व मातुरर्थं च द्विगुणं घृतं क्रीत्वा नय, अन्यच्च यदि धनं द्विगुणम् अन्यत् कारयितुं इच्छसि, तर्हि अद्य सायंकाले आगच्छ, अहम् अत्रैव सायंकालं यावत् तिष्ठामि।***

रमेशः – (विनम्रतया) ***अस्तु, बाबा! अहम् चलामि, धन्यवादान् वितरामि भवद्भ्यः।***

साधुः – ***श्रूयताम्। नैव एतत् सर्वम् अन्यं प्रति कथय, नैव अहं सर्वेषां धनं द्विगुणं करोमि। त्वं तु अतीव श्रेष्ठः प्रतीतः, अनेन मया एतत् सर्वं कृतम्। अन्येषां कृते एतत् सर्वं नास्ति, यतोहि मम तपः क्षीयते एवम् करणेन।***

रमेशः – ***बाबा! समीचीनं कथितं भवता, अवगतोऽस्मि।***

(इत्युक्त्वा गच्छति, आपणाच्च द्विशतेन रूप्यकेण घृतं क्रीत्वा स्व मातुः समीपं गच्छति ददाति च घृतम्)

माता – (आश्चर्येण) ***अरे! एतावत् घृतं कथम् आनीतं त्वया, मया तु शतरूप्यकाणि खलु दत्तानि?***

रमेशः – ***हे मातः! नैव एतत् शतरूप्यकस्य घृतम् अस्ति, अपितु घृतम् एतत् वै द्विशतरूप्यकाणां खलु वर्तते।***

माता – ***कथं एतत् सम्भवं जातम्, शतरूप्यकेण द्विगुणं घृतम्?***

रमेशः – ***अम्ब! अहं घृतं आनयनार्थं गच्छामि स्म, तदैव मार्गे तावत् एकः साधुः अमिलत्। तेन साधुना खलु स्व तपसा बलेन मम शतरूप्यकाणि द्विशतं कृत्वा प्रदत्तानि। तैः खलु रूप्यकैः अहं घृतम् एतत् आनीतवान् तवार्थम्।***

माता – ***यदि एवम् अस्ति, तदा तु तेन साधुना स्व-अन्यानि खलु रूप्यकाणि द्विगुणं कारयामि अहम् अपि, मम समीपे एक-सहस्र-रूप्यकाणि सन्ति, बहुपरिश्रमेण मया तानि संचितानि, इति।***

रमेशः – ***मातः! नैव एतद् उचितम्, यतोहि अधिकः लोभः कदापि नैव करणीयः। अनेन पश्चात् पश्चात्तापः खलु भवति।***

माता – ***अरे! नैव एवम् अस्ति। एवं तु यदा-कदा वै भवति, ईदृशानां साधूनां दर्शनम् महता पुण्येन किल भवति। सिद्धि-सम्पन्ना ईदृशाः साधवस्तु प्रायः पर्वतेषु किं वा गुहासु निवसन्ति, इतस्ततः नैव भ्रमन्ति। एते ग्रामेषु कदापि नैव आगच्छन्ति। त्वम् अतीव सौभाग्यशाली, यत् अस्य महानुभावस्य दर्शनं संजातम्, अहमपि तेन सह मिलितुं वांछामि।***

रमेशः – (अतीव औत्सुक्येन) ***अम्ब! किम् एवमस्ति?***

माता – अस्ति एवमेव, अधुना नैव विलम्बः करणीयः अहमपि तस्य साधोः महात्मनः दर्शनं कर्तुं वांछामि, नयतु मामपि तस्य समीपे।

रमेशः – अम्ब! यदि एवमस्ति, तार्हि अहं तत्र साधोः समीपं भवतीं नयामि। तेन मया कथितम् आसीत्, यत् यदि अन्यं धनमपि द्विगुणं कर्तुं वांछसि, तार्हि सायंकाले आगच्छतु।

माता – (माता स्व पेटिकातः स्व संचितानि सहस्ररूप्यकाणि आभूषणानि च गृह्णाति। द्वावेव खलु शीघ्रतया साधुं प्रति गच्छतः। साधुः दूरतः खलु रमेशं तया मात्रा सह आगच्छन् दृष्ट्वा नेत्रे निमील्य मन्त्रजापं करोति, तदैव मार्गे रमेशस्य मित्रः खगेशः मिलति।)

खगेशः – अरे! 'आंटी' भवती.....? एतावती शीघ्रतावशात् कुत्र गच्छति भवती?

(रमेशस्य माता खगेशात् किंचिद् आवृतं करोति। खगेशः सी.आई.डी. विभागे सेवारतोऽस्ति? तयोः द्वयोः हावभावेन स अवगच्छति, किंचिद् अवश्यमेव गूढम् अस्ति, इति)

खगेशः – आंटी! यदि भवती मां प्रतिं नैव कथयितुं वांछति, तर्हि नैव आवश्यकता एतस्य, विरमतु तावत्, अहमपि इदानीं शीघ्रतायाम् अस्मि। अन्ये दिने मिलिष्यामः। अस्तु, नमस्ते 'आंटी'।

(इत्युक्त्वा खगेशः किंचिद् गत्वा वृक्षस्य पृष्ठे तिष्ठति, रमेशः तस्य माता च द्वावेव अग्रे गच्छतः, खगेशश्च तयोः अनुकरणं करोति स्वं आवृतं कृत्वा।)

रमेशः – (साधोः समीपं गत्वा) *बाबा! एषा मम माता अस्ति, भवता अतीव अनुकम्पया मम शतरूप्यकाणि द्विगुणी कृतानि, अनेन प्रभाविता एषापि भवतः समीपे आगतवती, अस्याः समीपे सहस्ररूप्यकाणि आभूषणानि च कानिचित् सन्ति। अतः भवान् कृपया एतानि सर्वाणि द्विगुणाणि करोतु।*

साधुः – अरे वत्स! मया तु कथितम् आसीत् यत् एतत् सर्वं नैव कुत्रापि कथनीयम्, तदा त्वया कथम् एतदम्बां प्रति कथितम्?

रमेशः – बाबा! नैवाहं एतत् सर्वं स्व मातां प्रति कथयितुं वांछामि स्म, किन्तु अनया मह्यं शपितं तदा मया अनिच्छयापि कथितम्। बाबा! मम माता धनस्य अतीव आवश्यकताम् अनुभवति अद्यत्वे, यतोहि किंचिद् कालानन्तरं मम भगिन्याः विवाहोऽस्ति। अतः भवान् धनम् एतत् द्विगुणं करोतु कृपया, यत् मम मात्रा आनीतम्।

(खगेशः दूरे वृक्षस्य पृष्ठे भूत्वा सर्वं शृणोति, सजगश्च भवति।)

साधुः – अस्तु, किन्तु एतदर्थं युवाभ्यां किंचिद् कालं यावत् अस्य धूनी समीपे स्थातव्यम् एतावतः धनस्य द्विगुणे करणे कालं किंचिद् लगिष्यति खलु।

माता – सम्यक् अस्ति, बाबा! आवाम् द्वावेव नेत्राणि निमील्य अस्य धूनी समीपे स्थास्यावः, प्रतीक्षां च करिष्यावः। भवान् कृपया धनमेतत् द्विगुणं करोतु।

(रमेशः तस्य माता च धूनी समीपे तिष्ठतः, साधुः तं धनं सर्वं एकस्यां पोटली-मध्ये निक्षिप्य तत्रैव धूनीं निकषा निक्षिपति।)

साधुः – भवन्तौ नेत्रे निमील्य कालीमातुः घ्यानं कुरुताम्, यदि मत्कथनात् पूर्वं भवन्तौ मध्ये नेत्रे

उन्मीलिष्यतः, तर्हि युष्माकं धनम् एतत् सर्वं भस्मी भविष्यति, इति।

(रमेशः तस्य माता च धूनी समीपे नेत्रे निमील्य तिष्ठतः, कालीमातुः च ध्यानं कुरुतः, खगेशः दूरे वृक्षस्य पृष्ठे स्थित्वा सर्वं शृणोति पश्यति च। तदानीमेव साधुः अग्निमध्ये किंचित् पातयति, मन्त्रं च बुद्बुदायते, अन्ते खलु स्वाहा..... इति शब्दस्य उच्चारणं उच्चस्वरेण करोति। तदैव धूनीतः निस्सरितेन धूमेन रमेशः तस्य माता च अचेतनतां लभते। तदैव साधुः धनस्य पोटलिकां गृहीत्वा तस्मात् स्थानात् पलायनं करोति। एतत् सर्वं दृष्ट्वा खगेशः बहिरागच्छति वृक्षस्य पृष्ठभागात्)

खगेशः – (उच्चस्वरेण) ***भो! साधुः कुत्र पलायते, धनम् एतत् द्विगुणं न करिष्यसि?***

(खगेशं दृष्ट्वा साधुः भीतो भवति, तीव्रगत्या च धावनं करोति, खगेशः स्व लघुभुशुण्डिकां (रिवाल्वर), इति निस्सारयति कथयति च)

खगेशः – भो! साधु बाबा, तिष्ठतु तावत्, अन्यथा गुलिकां चालयिष्यामि।

(इत्युक्त्वा तस्य पृष्ठे तीव्रगत्या धावति, साधुः नैव विरमति। खगेशः तस्य पृष्ठे धावति, तस्य एकस्मिन् पादे च गुलिकां चालयति स्व लघु-भुशुंडिकातः, सा गुलिका तस्य साधोः पादे लगति, सः अधः पतति)

साधुः – हा! हतोऽहम्।

(इत्युक्त्वा साधुः भूमौ पतति, खगेशः तं बन्दीकरोति। अन्यत्र गुलिकायाः ध्वनिं श्रुत्वा रमेशः तस्य माता च चेतनतां लभेते। लघुभुशुण्डिकायुक्तं खगेशं, बन्दीं साधुं च दृष्ट्वा सर्वं घटनाक्रमम् अवगतवन्तौ तौ।)

खगेशः – 'आंटी! अयं कापटिकः साधुः भवत्याः धनं गृहीत्वा पलायते स्म। भवत्याः तु मम किमपि न कथितम्, किन्तु तदानीमेव मया सर्वम् अवगतम् यतोहि भवती किंचिद् मां प्रति आवृतं करोति स्म।

रमेशस्य माता – (स्व धनस्य पोटलिकां खगेशस्य हस्तात् गृहणन्) ***पुत्र! समीचीनं कथ्यते त्वया, अहं लोभयुक्ता संजाता, अनेनैव अस्य कापटिकस्य वचने विश्वसिता। अयं धूर्तस्तु मम दीर्घकालिकम् अर्जितधनं गृहीत्वा पलायते स्म। त्वया घनस्य मम च रक्षा कृता, अतीव कृत्कृत्याऽहम्।***

(एवं उक्त्वा रमेशस्य वृद्धा माता हस्तौ प्रसार्य आशीर्वादं ददाति, नेत्राभ्यां च अश्रूणि मुंचति)

खगेशः – आंटी! एष अतीव दुर्दान्तः दुष्टः लुण्ठकोऽस्ति, अस्य च बहुदिवसात् अन्वेषणम् अकर्वां वयम्। भवत्याः कारणेन मया गृहीतः एषः वंचकः। अस्योपरि पंच सहस्ररूप्यकाणि पुरस्कारस्वरूपेण आसन्, तत् सर्वम् अधुना भवतीभ्यः मिलिष्यति सी.आई.डी.विभागतः।

माता – (नेत्रे विस्फारिते कृत्वा) ***पंचसहस्राणि रूप्यकाणि?*** (अनन्तरं किंचिद् विचार्य सामान्या भूत्वा कथयति) युवयोः ***समक्षे अद्य अहं संकल्पयामि यत् कदापि स्व जीवने एवं लोभो न करिष्यामि, अन्येषाम् अपि निर्दिष्यामि यत् ते कदापि स्वजीवने लोभः न कुर्युः।***

(यवनिका आवृतीभवति।)

RNI No.
DELSAN/2002/8921



प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी
के स्वामित्व में अकादमी के कार्यालय प्लाट सं.-५,
झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
से प्रकाशित